## READING - 7

यदा दशरथस्याज्ञा जनैः श्रुता तदायोध्यानन्देन पूर्णेवाभवत् । नगरस्य मार्गेषु लोका गायन्ति नृत्यन्ति च । तेन च स्वर्गे ऽपि देवास्तुष्टा अभवन् । अहो वृद्धेन पित्रा राघवो राजा कृत इत्युक्तं तैः । किं बहुना । अभिषेकस्य श्रवणादयोध्यानन्दस्य सागरे निमग्नेवाभवत् । पितुर्वचनं श्रूयते रामेणापि । तेन वचनेन प्रमुदितो ऽपि स दुःखस्य लेशमन्वभवत् । यदि राज्यं मया क्रियते तर्हि प्रियः पिता वनं गच्छति । तदा भ्रातृभिः सह कथमिह तिष्ठाम्यहमिति ॥